# Shri Yogeshvari Kavacham

# શ્રીયોગેશ્વરીકવચમ્

## Document Information

Text title : Shri Yogeshwari Kavacham

File name : yogeshvarIkavacham.itx

Category : devii, devI, kavacha

Location : doc_devii

Description/comments : rudrayAmale bahurUpAShTaka prastAve IshvarapArvatI saMvAde

Acknowledge-Permission: http://chitpavanfoundation.org/Chitpavans/

Latest update : January 28, 2019, July 5, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2023

*sanskritdocuments.org*

# Shri Yogeshvari Kavacham

# શ્રીયોગેશ્વરીકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીયોગેશ્વર્યૈ નમઃ ।
દેવ્યુવાચ -
ભગવન્સર્વમાખ્યાતં મન્ત્રયન્ત્રાદિકં ત્વયા ।
યોગિન્યાઃ કવચન્દેવ ન કુત્રાપિ પ્રકાશિતમ્ ॥ ૧॥

શ્રોતુમિચ્છામ્યહં દેવ કૃપાપાત્રં તવાસ્મ્યહમ્ ।
કથયસ્વ મહાદેવ યદ્યહં તવ વલ્લભા ॥ ૨॥

ઈશ્વર ઉવાચ -
શૃણુદેવિ મહાવિદ્યાં સર્વદેવપ્રપૂજિતામ્ ।
યસ્યાઃ કટાક્ષમાત્રેણ ત્રૈલોક્યવિજયી હરિઃ ॥ ૩॥

સૃષ્ટિકર્તા ભવેદ્બ્રહ્મા સંહર્તાહં તથૈવચ ।
યસ્યાઃ સ્મરણમાત્રેણ દેવાદેવત્વમાપ્નુયુઃ ॥ ૪॥

રહસ્યં શૃણુવક્ષ્યામિ યોગેશ્યાઃ પ્રાણવલ્લભે ।
ત્રૈલોક્યવિજયં નામ કવચં મન્ત્ર વિગ્રહમ્ ॥ ૫॥

અસ્ય શ્રીયોગેશ્વરીકવચસ્ય મહાદેવ ઋષિઃ । અનુષ્ટુપ્છન્દઃ ।
શ્રીયોગેશ્વરી દેવતા । ઐં બીજમ્ । હ્રીં શક્તિઃ । શ્રીં કીલકમ્ ।
મમ યોગેશ્વરીપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
અથન્યાસઃ -
શ્રીમહાદેવ ઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્ છન્દસે નમઃ મુખે ।
શ્રીયોગેશ્વરી દેવતાયૈ નમઃ હૃદયે ।
ઐં બીજાય નમઃ દક્ષિણસ્તને ।
હ્રીં શક્તયે નમઃ વામસ્તને ।
શ્રીં કીલકાય નમઃ નાભૌ ॥

ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હ્રીં તર્જનીભ્યાં નમઃ ।
શ્રીં મધ્યમાભ્યાં નમઃ ।
ઐં અનામિકાભ્યાં નમઃ ।
હ્રીં કનિષ્ઠિકાભ્યાં નમઃ ।
શ્રીં કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ઐં હૃદયાય નમઃ ।
હ્રીં શિરરોસ્વાહા ।
શ્રીં શિખાયૈ વષટ્ ।
ઐં કવચાય હું ।
હ્રીં નેત્રત્રયાય વૌષટ્ ।
શ્રીં અસ્ત્રાયફટ્ ।
ભૂર્ભુવઃ સ્વરોમિતિ દિગ્બન્ધઃ ।
અથ ધ્યાનમ્ -
ખડ્ગપાત્રં ચ મુસલં લાઙ્ગલં ચ બિભર્તિ સા ।
આખ્યાતા રક્તચામુણ્ડા દેવી યોગેશ્વરી તથા ॥

ઇતિ ધ્યાત્વા પઞ્ચોપચારૈઃ સમ્પૂજ્ય કવચં પઠેત્ ।
અથ કવચમ્ ।
શિરો મે શાઙ્કરી પાતુ મૂર્ધ્નિ નારાયણી તથા ।
ઐં બીજા ભાલદેશેતુ હ્રીં બીજં દક્ષનેત્રકે ॥ ૧॥

શ્રીં બીજં વામનેત્રે ચ દક્ષશ્રોત્રે પરાસ્મૃતા ।
વામશ્રોત્રે નારસિંહી નાસામૂલઞ્ચ ખડ્ગિની ॥ ૨॥

નાસિકાં માનિની પાતુ મુખં મેડવતુ ચામ્બિકા ।
કપોલૌ ભૂતસંહારી ચુબુકં ભ્રામરી તથા ॥ ૩॥

કણ્ઠં મે ચણ્ડિકા પાતુ હૃદયં વિન્ધ્યવાસિની ।
ઉદરે ગિરિજા પાતુ નાભિં મેવડતુ ભોગિની ॥ ૪॥

શુમ્ભિની પૃષ્ઠદેશે ચ સ્કન્ધયોઃ શૂલધારિણી ।
હસ્તયોર્યોગિની રક્ષેત્કમ્બુકણ્ઠ્યઙ્ગુલીસ્તથા ॥ ૫॥

કટ્યાં ચ સુન્દરી રક્ષેદ્ગુહ્યં ગુહ્યેશ્વરી તથા ।

કુબ્જિકા પાતુ મે મેઢ્રં પાતુ દેશેચ શામ્ભવી ॥ ૬॥

ભદ્રકાલી પાતુ ચોર્વો જાન્વોર્મેઽવતુ કાલિકા ।
જઙ્ઘે પાતુ મહાભીમા ગુલ્ફયોર્વતુશૂલિની ॥ ૭॥

પાદયોઃ શ્રીધરી રક્ષેત્સર્વાઙ્ગે યોગિની વતુ ।
રક્તમજ્જાવસામાંસાન્યસ્થિમેદાંસિ ભૈરવી ॥ ૮॥

ચામુણ્ડા ચૈવ વારાહી કૌમારી વૈષ્ણવી તથા ।
માહેશ્વરી ચ સર્વાદ્યા જયશ્રીર્મઙ્ગલા તથા ॥ ૯॥

રક્ષન્તુ સ્વાયુધૈર્દિક્ષુ માં વિદિક્ષુ યથા તથા ।
ઇતીદં કવચં દિવ્યં પઠનાત્સર્વસિદ્ધિદમ્ ॥ ૧૦॥

સ્મરણાત્કવચસ્યાસ્ય જયઃ સર્વત્ર જાયતે ।
રાજદ્વારે સ્મશાને ચ ભૂતપ્રેતાભિચારકે ॥ ૧૧॥

બન્ધને ચ મહાદુઃખે જપેચ્છત્રુસમાગમે ।
પ્રયોગચ્ચાભિચારં ચ યો નરઃ કર્તુમિચ્છતિ ॥ ૧૨॥

અયુતાચ્ચ ભવેત્સિદ્ધિઃ પઠનાત્કવચસ્ય તુ ।
સર્વત્ર લભતે કીર્તિઃ શ્રીમાન્ભવતિ ધાર્મિકઃ ॥ ૧૩॥

ભૂર્જપત્રે લિખિત્વા તુ કવચં યસ્તુ ધારયેત્ ।
મન્ત્રસિદ્ધિમવાપ્નોતી યોગેશ્વર્યાઃ પ્રસાદતઃ ॥ ૧૪॥

પુત્રવાન્ધનવાન્છ્રીમાન્નાનાવિદ્યાનિધિર્ભવેત્ ।
બ્રહ્માસ્ત્રાદીનિ શસ્ત્રાણિ નશ્યન્તિ પઠનાચ્ચ વૈ ॥ ૧૫॥

ઇદં કવચમજ્ઞાત્વા યોગિનીં લભતે ન ચ ।
શતલક્ષપ્રજપ્ત્વાપિ તસ્ય વિદ્યા ન સિદ્ધ્યતિ ॥ ૧૬॥

ઇતિ શ્રીરુદ્રયામલે બહુરૂપાષ્ટકપ્રસ્તાવે
ઈશ્વરપાર્વતીસંવાદે યોગેશ્વરીકવચં સમ્પૂર્ણમ્ ॥

અથ મૂલ મન્ત્રઃ -
ૐ હ્રીં નમો ભગવતિ રક્તચામુણ્ડે યોગેશ્વરી,
યોગિનીં હ્રીં સ્વાહા ઇતિ મન્ત્રઃ
રક્તચામુણ્ડાયૈ વિદ્મહે ભૂત સંહારિણ્યૈચ ધીમહિ ।
તન્નો યોગેશ્વરી પ્રચોદયાત્ ॥

ગુહ્યાતિગુહ્યગોપ્ત્રી ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવી ત્વપ્રસાદાત્ત્વયિ સ્થિતિઃ ॥

લં, હં, યં, રં, વં ।
અથ મહામન્ત્રઃ-
ૐ અસ્ય શ્રીયોગેશ્વરી મહામન્ત્રસ્ય મહાદેવઋષિઃ અનુષ્ટુપ્ છન્દઃ ।
શ્રીયોગેશ્વરી દેવતા । હ્રીં બીજમ્ । શ્રીં શક્તિઃ । ક્લીં કીલકમ્ ।
મમ ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
અથ ન્યાસઃ-
ૐ હ્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ યં તર્જનીભ્યાં નમઃ ।
ૐ યાં મધ્યમાભ્યાં નમઃ ।
ૐ રુદ્રદ્રેવત્યા અનામિકાભ્યાં નમઃ ।
ૐ યોગેશ્વર્યૈ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ સ્વાહા કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિ ન્યસેત્ ।
અથ ધ્યાનમ્ ।
ૐ દેવીં ભક્તજનપ્રિયાં સુવદનાં ખડ્ગં ચ પાશં તથા
    સ્વર્ણાલઙ્કૃતલાઙ્ગલં સુમુસલં હસ્તૈર્દધાનાં શ્રિયમ્ ।
વિદ્યુત્કોટિરવીન્દુકાન્તિધવલાં દન્તાસુરોન્મૂલિનીં
    બ્રહ્મેન્દ્રાદ્યભિવન્દિતાં ચ વરદાં યોગેશ્વરીં સંભજે ॥ ૧॥

લં પૃથિવ્યાદિ પઞ્ચમાનસોપચારૈઃ સમ્પૂજ્ય જપેત્ ।
અથ મન્ત્રઃ ।
ૐ હ્રીં યં યાં રુદ્રદેવતાયૈ યોગેશ્વર્યૈ સ્વાહા ॥

ઉત્તર ન્યાસં કૃત્યા ગુહ્યાતિગુહ્યગોપ્ત્રીત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિભર્વતુ મે દેવિત્વત્પ્રસાદાત્સુરેશ્વરિ ॥

ઇતિ ॥

શ્રીયોગેશ્વર્યૈ નમઃ ।
ૐ ૐ ૐ

*Shri Yogeshvari Kavacham*

pdf was typeset on October 15, 2023

Please send corrections to *sanskrit@cheerful.com*